# गैर्वाणी वाणी

**प्रो. वाई.एस्.रमेशः**
राष्ट्रियसंस्कृaतसंस्थासन्नम्
जयपुरपरिसरः, जयपुरम्

**सारांशः -**

विश्वस्य भाषासु सर्वतः पुरातनीयम् अमरभाषा। अन्यभाषाणाम् इव संस्कृतस्य अपि भाषारूपेण सर्वत्र प्रयोगः भवेत्, राष्ट्रजीवनस्य सर्वेष्वपि क्षेत्रेषु संस्कृतं पुनरा गच्छेत् इति - अपेक्षया स्वप्ने संस्कृतमात्रा सह मम यः संवादः जातः तमेव संवादं ''गैर्वाणी वाणी'' इति शीर्ष कमभिव्यनक्ति। संस्कृतमातुः व्यथाश्रवणं - तदपसारणाय यद्यत् करणीयं यैश्च करणीयं तदत्रोपस्थापितम्।

**उद्देश्यानि -**

- सर्वेऽपि संस्कृतगिरा भाषेरन् इति सङ्कल्पनम्।
- संस्कृतस्तोत्र-श्लोक-सूक्ति-कथानां श्रवणपरम्परा-उज्जीवनीयेति निश्चयायाभिप्रेरणम्।

**मुख्यशब्दाः -**

वाणी गैर्वाणी , मुखकमलं व्यथाचन्द्रेण सङ्कुचितम् - आधुनिकावस्था।

**प्रस्तावना -**

सर्वसत्वसुखदःसायङ्कालः। विश्रामायोद्यानं गतोऽहं शिलायामुपाविशं मलयाचलसञ्जातो भगवान् मातरिश्वा सुमसौरभ्यभरेणेव मन्दं वहन् ल लाटनिकुरूम्बितान् स्वे दसीकरान् मे पपौ। देवोऽप्यंशुमाली पश्चिमदि ङ्गनाया मुख इवाम्बरतले कुंकुमतिलकायते स्म। स्व स्व नीडं प्रति गच्छतःकलं विरूवन्तो विहङ्गाविहायसि सकुतुकमितस्ततःसञ्चलन्तआसन्।सायङ्कालातपेनरक्तीभूताःपयोधरखण्डा आकाशं विद्रुमलता इव पयोनिधावभासिषुः।दीपाराधनसमयसूचकःघण्टारवःनिकटस्थमन्दिरात् वा यौ मन्दं प्लवमान आगच्छत्। आह्लादकरीं रमणीयतामेतादृशीमनुभवन्नहं तत्रैव शिलातले शयित आसम्।

"अहोममदौर्भाग्यम्" इति कोऽपि शब्दोऽश्रावि। केन खलूक्तं स्यादिदमिति परितोऽद्राक्षम्। न कोऽपि दृष्टः।कथमपिशब्दागमनदिशं निर्णीय तेनैव यथा कियद्दूरमगमम्।अहो!तत्रखलु"मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः" इत्युक्तेरादर्शभूतां कामपि रमणीयां रमणीं शिलायामुपविष्टामपश्यम्। तस्यामुखचन्द्रः चिन्तामेघेनाच्छादितोऽभवत्। मां दृष्ट्वा सा ससम्भ्रममुदतिष्ठत्।

अहमवोचम्- देवि! अलं कातरतया।उपविशत्वम्बा।जिज्ञासुरहंदेवि, कासित्वम्? किमर्थमत्रैकान्ते निविष्टासि? कया वा चिन्तयास्याक्रान्ता? इति। सा अवदत् 'यद्यस्ति शुश्रूषा शृणु तावत्।मां किल विदुः"वाणी गैर्वाणी" इति।

सद्योऽहमुत्थाय प्रदक्षिणीकृत्य पादयोः प्रणिपत्य- 'नमस्तेवाणिगैर्वाणि। समस्तानां भाषाणां त्वमसि माता।अम्बकृतार्थोऽस्मि संवृत्तोऽहमद्य त्वदर्शनात्।सकललोकजनन्याःचिरन्तन्याःतवापि मुखकमलं व्यथाचन्द्रेण



Peer reviewed refereed journal

संकुचितमिवाभाति।यदिनस्यात्रहस्योपघातःअनौचित्यं वा कथयत्वम्बा शोकहेतुम्। यावच्छक्ति यतेय तावदस्यप्रतीकाराय।इति सभक्त्युन्मेषमभणम् सा दीर्घमुष्णं च निश्वस्य वक्तुमारभत। 'वत्स न तवाविदितमेतत् य त् पु रा किल ऋगाद्यागमाःरामायणादय इतिहासा: अष्टादशपुराणानि विवाहादिव्यवहाराश्च मयैव प्राकाशिषत। सर्वेषामपिमुखपद्मेषु निर्भयाऽहंरममाणा आसम्। न केवलं भारतीयाः परं शर्मण्यादिविदेशीया अपि विविधानां ग्रन्थानां प्रकाशनेन पठनेन च मां पुरस्कृतवन्तः। सर्वैरप्येवमहं परमोत्कृष्टस्थाने निविष्टा बन्दिता नन्दिता चाभवमिति।

पुनरप्येकवारं दीर्घं निश्वस्य परमहो कथं कथयेयमाधुनिकावस्थां मम। अद्य पुनर्ये मां जानन्ति मदुत्कर्षाय यतन्ते च ते सहस्रेष्वेकद्वा एव। इतरे बहवो न मां जानन्तीति केवलं, परं निन्दन्ति परिहसन्ति च। जीवन्तीमपि मां मृतामामनन्ति किल नराः। व्यवहारेनास्मीति मन्वाना युवानो मां नोपसर्पन्ति। इदमेव मां क्रकच इव खेदयति। इति।

तस्याश्चक्षुभ्यां मौक्तिकमालावत् अश्रुपरम्परा पपात। अहमपि कथञ्चनात्मानं संस्थाप्य मन्दमवोचम् देवि! समाश्वसिहि समाश्वसिहि अलं विषादेन। बलवती खलु भवितव्यता। को नु खलु शक्नोति सर्वशक्तस्य कालचक्रस्यावेगादात्मानमवष्टम्भयितुम् त थाऽप्यहं तथा यतेय यथा पूर्वस्मादप्युत्कृष्टतरे स्थाने निवेशितायाःअम्बायाःसागरमेखला भूरेव दास्यं विधास्यति। इति। कथमेतच्छक्यं त्वया? इति तयापृष्टोऽहं पुनरवोचम्। शृणोत्वम्बा। सर्वैरप्यस्मिन्कर्मणियतनीयम्। प्रथमं तावत् राजकीयानां करणीयं वदामि। तद्यथा -

1. प्रथमकक्ष्याया आरभ्य सर्वेषामपि छात्राणां संस्कृतभाषा हिन्दी-आंङ्गलीवत् नियतपाठ्या कल्पनीया।
2. संस्कृतनिदेशालये संस्कृताकादम्यां च कार्यरताःसर्वेऽपि सदस्याःसंस्कृतगिरा भाषेरन्। पत्राचारादिकं च तयैव प्रवर्तयेयुः।
3. संस्कृतशिक्षामन्त्री संस्कृतं प्रति श्रद्धधानःतद्विकासे दत्तचित्तःस्यात्।
4. संस्कृतशिक्षाविकासाय निर्धार्यमाणं प्राक्कलनम्(Budget) संस्कृतसेवकानां वेतनातिरिक्तं विकासयोजना सञ्जीवकं स्यात्।
5. प्रतिवर्षं प्रान्तीयसंस्कृतप्रणयिनां सम्मेलनं सम्पाद्य संस्कृतस्याभिवृद्धयै किं-किं कर्तव्यमिति, युवसु संस्कृतं कथं सक्रियं स्यादिति च पर्यालोच्य यथोचितं समाचरणीयम्।
6. प्रतिहायनं ग्रन्थनिर्माणस्पर्धां विधाय यः उत्कृष्टतरं ग्रन्थं निर्मिमीते स पारितोषिकदानपूर्वकं माननीयः। अनेन नवनवाग्रन्था निर्मिता भवेयुः। पत्रिकाभिरप्यस्मिन् विषये बहुधा यतितव्यम्।
7. संस्कृतप्रणयिभिःस्व-स्व माता-पिता-भ्राताइत्येता नितरान् सर्वान्संस्कृतज्ञान् कर्तुं प्रयतितव्यम्।
8. ये ये धनिकाः सन्ति तैः संस्कृतपत्रिकासञ्चालनाय संस्कृताध्येतृणां प्रोत्साहनाय भाषाया अस्याःअभिवृद्धयै च धनानि दातव्यानि।
9. संस्कृतमाध्यमेन विना भाषा जनभाषाभवितुं नार्हतीति उररीकुर्वन्तोऽध्यापका: प्रारम्भिकस्तरादारभ्य उच्चस्तरंयावत्तन्माध्यमेन पाठयितुं कटिबद्धाःस्युः।
10. ये तावत्तन्माध्यमेनाध्यापयितुमुत्सहन्ते, ये युवानश्चकिञ्चिन्मात्रेण संस्कृतेन भाषितुमुद्यता: वर्तन्ते तेषामभिवृद्धये शासनं दत्तचित्तं स्यात्।
11. संस्कृतस्तोत्राणां, श्लोकानां, सूक्तीनां, कथानां च श्रवणपरम्परा पुनरूज्जीवनीया।

12. अन्तःशास्त्रीयमध्ययनं प्रेरणीयम्।
13. सर्वेषु अध्ययनक्षेत्रेषु संस्कृतस्यान्वयनं कथं स्यादिति शासनं विद्वद्भिः सह पर्यालोच्य तत्तत्स्तरीयसंस्कृतशिक्षकान् प्रेरयेत्।
14. संस्कृतच्छात्राः गीतानि, श्लोकान्काव्यानिकण्ठे कुर्युः। तत्र स्पर्धाः विधाय सामाजिका, स्व-स्व पुत्राः पुत्र्यश्च संस्कृतं जानन्ति इति सगर्वमुन्नतकन्दरा यथा स्युःतथा योजनाविधातव्याः। इति व्यरंसिषम्।

**निष्कर्षः -**

श्रुत्वा चैतत्मद्वचः सा सानन्दमभणत्। भद्र! भद्रमस्तु ते। सिद्धिमियात्ते अभिलाषः। अहमपि साधयामि तावत्यतःअर्धरात्रात्परं नाहं शक्ष्यामि दिवमारोढुमिति। उत्तरस्मिन्क्षणे किमतितेजः अस्फुरत्। क्षणात्तेजसा सहैव साऽप्यन्तर्दधे।

अहमपि झटिति चक्षुरुदमीलयम्। तदैवाज्ञासिषं यदेतावता कालेन प्रवृत्तं सर्वं स्वप्ने इति।

**सन्दर्भग्रन्थाः -**


1. झा, सुरेन्द्रः (2004); प्राचीनशिक्षापद्धतिः, आशुतोषप्रकाशनम्, लखनऊ।
2. उपाध्याय, दुर्गावती (1991); विगत (उन्नीसवीं) शताब्दी में संस्कृत शिक्षा की स्थिति , सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी।
3. द्विवेदी, कपिलदेव, (1975) संस्कृतनिबन्धशतकम्, विश्वविद्यालयप्रकाशनम्, वाराणसी।
4. पाण्डेय, रामशकल (2010);संस्कृतशिक्षण, श्रीविनोद पुस्तक मन्दिर, आगरा।
5. सिंह, कर्ण (2002) संस्कृतशिक्षणविधि, एच.पी.भार्गव बुक हाउस, आगरा।
6. Mishra, K.K. (1997); Sanskrit Studies in India, Rashtriya Sanskrit Sansthan, New Delhi.


Peer reviewed Referred Journal